No. २०८९

Title परा प्रवेशिका

Author ×

Extent ६ Age ×

Subject भक्ति शास्त्र

2089

Total Extent = 6

परापूवेशिका

२०८९

श्रीगणेशायनमः विश्वात्मिकांतदुत्तीर्णांहृदयंपरमेशितुः
परादिशक्तिरूपेणस्फुरंतींसंविदंनुमः इहखलुपरमेश्वरः
प्रकाशात्मा प्रकाशश्चविमर्शस्वभावः विमर्शोहिनामवि
श्वाकारेणविश्वप्रकाशेनविश्वसंहारेणवाऽकृत्रिमाऽहमि
तिविस्फुरणं यदिनिर्विमर्शःस्यादनीश्वरोजडश्चप्रसज्ये राम
त एषएवचविमर्शश्चिच्चैतन्यंस्वरसोदितापरावाक्स्वातं १
त्र्यंपरमात्मनोमुख्यमैश्वर्यंकर्तृत्वंस्फुरत्तासारोहृदयस्पंद

इत्यादिशास्त्रे रागमेसाहोष्यते अतएवाहगिमाहमितिसत
त्यः स्वयंप्रकाशरूपः परमेश्वरः पारमेश्वर्य्याक्रियावादिधर्म·
शंयतंजगदात्मनास्फुरतिप्रकाशते जगतः कर्तृत्वेनाजड
त्वंच जगतः कार्य्यत्वमप्येतदधीनप्रकाशत्वमेव एवंभूतं
जगत्प्रकाशरूपात्कर्तुर्महेश्वरादभिन्नमेव भिन्नत्वे ह्यप्रका
शमानत्वेनप्रकाशनायोगान्नकिंचित् अनेनचजगताः
स्यभगवतः प्रकाशात्मकं रूपंनकदाचित्तिरोधीयते एतस्य

२

काशनेन प्रतिष्ठां लब्धा प्रकाशमानमिदं जगदात्मनः प्राणभू
तं कथं विरोद्धुं शक्नुयात् कथं चात्मनि हृद्यस्यायमवतिष्ठते आ
तथ्वास्य वस्तुनः साधकमिदं बाधकमिदं प्रमाणमिमन्तु संधा
नात्मकसाधकबाधकप्रमातृरूपतयावाऽस्य सद्भावः तद्भा
वे किं प्रमाणमिति वस्तुसद्भावमनुमन्यता हृदस्वभावे किं प्रमा राम
णमिति प्रहृरूपतया सर्वसिद्धस्य महेश्वरस्य स्वयं प्रकाशत्वेस २
र्वस्य स्वसंवेदनसिद्धं किंच प्रमाणमपि प्रमात्रितप्रमाणं भ

यति तस्य प्रमातां तदधीनशरीरप्राणनीलसुखादिवेद्यं चाति
शय्य सदाभासमानस्य सर्वप्रमितिभाजः सिद्धावभिनवार्थप्रका
शस्य प्रमाणवराकस्य कस्योपयोगः एवं च शब्दराशिमयपूर्णा
हंतापरामर्शसारत्वात् परमशिव एव षट्त्रिंशत्तत्त्वात्मकः प्रपं
चः षट्त्रिंशत्तत्त्वानि च शिवशक्तिसदाशिवईश्वरः शुद्धविद्या
मायाकलाविद्यारागकालनियतिपुरुषः प्रकृतिमनोबुद्ध्यहं
कारश्रोत्रत्वक्चक्षुर्जिह्वाघ्राणवाक्पाणिपादपायूपस्थशब्द

3

स्पर्शरूपरसगंधाकाशवायुवह्निसलिलभूमयः एता
नि षट्त्रिंशत्तत्वानि तत्रशिवतत्वंनाम इच्छाज्ञानक्रिया
त्मककेवलपूर्णानंदस्वभावः परमशिव एव अस्यजग
त्स्रष्टुमिच्छांपरिगृहीतवतोपरमेश्वरस्यप्रथमस्पंदएवेच्छा
शक्तितत्वम् अस्मीति अहंतेच्छात्मदेवांकुरायमाणमिदंजग राम
त्स्वात्मनाऽहंतयाच्छाद्यस्थितंरूपंसदाशिवतत्वम् अंकुरितं ३
जगदहंतयाच्छाद्यस्थितमीश्वरतत्वम् अहंतेदंतयोरैक्यप्र

यथा ऽस्य स्वरूपं प्रकाशयितुं प्रारभ्यते सा ऽस्मत्कृता शिवतत्वप्रकाशि-
कायां प्रथममिदं सोपानं १

तिपत्तिः शुद्धविद्या स्वस्वरूपेषु भावेषु भेदप्रथमामाया यया
तु परमेश्वरः पारमेश्वर्य्यं मायाशक्त्या स्वरूपं गूहयित्वा संकु-
चितया ऽकर्तृतामश्नुते तदा पुरुषसंज्ञकः अयमेव मायामोहि-
तः कर्म्मबंधनः संसारी परमेश्वरादभिन्नोपि अस्य मोहः परमे-
श्वरस्य न भवेत् इंद्रजालमिवेंद्रजालिकस्य स्वेच्छयाऽसंपादि-
तत्वात्तैः अस्मात् एव मिथ्याभिज्ञापितैश्वर्य्यस्तु चिद्घनो मुमुक्षुः
परमशिव एव अस्य सर्वकर्तृत्वं सर्वज्ञत्वं पूर्णत्वं नित्यत्वं व्या-

पकत्वं च शाक्तयोः संकुचितान्यपि संकोचग्रहणेन कला
विद्यारागकालनियतिरूपतया भवंति अत्र कला नाम
स्य पुरुषस्य किंचित्कर्तृत्वहेतुः विद्या किंचिज्ज्ञत्वकारणं
रागो विषयेष्वभिष्वंगः कालो हि भावानां भासनाभासन
रूपाणां क्रमोऽवच्छेदको भूतादिः नियतिर्ममेदं कर्तव्यं रम
न कर्तव्यमिति नियमहेतुः एतत्पंचकमस्य स्वरूपावारक ४
त्वात्कंचुकमिति चोच्यते महदादिपृथिव्यंतानां तत्त्वानां

मूलकारणांग्रकृतिः एषाचसत्वरजस्तमसांसाम्यावस्थाऽ
विभक्तरूपा अहंकारोममेदंनममेदमित्यभिमानसाधनं
बुद्धिर्निश्चयसाधनम् एतत्र्यमंतःकरणं शब्दस्पर्शरूपर
सगंधात्मकानांविषयाणांक्रमेणग्रहणसाधनानिश्रोत्रत्व
क्चक्षुर्जिह्वाघ्राणानिपंचज्ञानेंद्रियाणिवचनादानविहरण
विसर्गानंदात्मकक्रियासाधनानिपरिपायूपाक्याणिपादपा
रूपस्याःपंचकर्मेंद्रियाणिशब्दस्पर्शरूपरसगंधाःसामान्याका

5

याः पंचतन्मात्राणि आकाशमवकाशप्रदं वायुः संजीवनः
अग्निर्दाहकः पावकश्च सलिलमप्यायकं भूमिर्धारिका एत
त्सर्वं यथा न्यग्रोधबीजस्थः शक्तिरूपो महाद्रुमः तथा हृदयबी
जस्थं जगदेतच्चराचरं इति परामहारिकारूपे हृदयबीजे तर्भू
१४ तं कथं यथा घटशरावादीनां मृद्विकाराणां पारमार्थिकं रूपं मृ
देव भवति यथा वा जलादिद्रवजातीयानां विचार्य्यमाणानां अ
वस्थितं रूपं जलादिसामान्यमेव भवति तथा पृथिव्यादिमा

स्वरूपं

यं तानंतत्यानां मननत्वं मीमांस्यमानं सदित्येव भवेत् अस्या
पि पदस्य निरूप्यमाणं स्वलक्षणं धात्वर्थव्यंजकं प्रत्ययांशं वि
सृज्यप्रसृतिमात्ररूपं भैरवाकारमेवावशिष्यते तदंतर्गतमे
कत्रिंशत्तत्वम् ततः परं शुद्धविद्येश्वरसदाशिवतत्वानि ज्ञान
क्रियासाराणि शक्तिविशेषत्वादोंकारेऽभ्युपगमेऽनंतरशक्ति
मयेऽनंतर्भूतानि अतः परमूर्ध्वाधः सृष्टिरूपो विसर्जनीयः
एवंभूतस्य हृदयबीजस्य महामंत्रात्मको विश्वमयो विश्वोत्ती

6

र्गः परमशिवस्यैव उदयविश्रांतिस्थानत्वान्निजस्वभा
वः ईहसां हृदयवीजं तत्वतोयोवेद ससमाविशतिच
सपरमार्थतोदीक्षितः प्राणान्धारयते लौकिकवद्वर्त
मानोजीवन्मुक्त एव भवति देहपाते च श्रीपरमशिव
भट्टारक एव भवति इतिपराप्रवेशिका ॥ ❁ ॥

राम
९